## क्षेपे। (१०८/३८४२)

क्षेपे गम्यमाने उदरादिषूत्तरपदेषु बहुव्रीहौ समासे [1]सञ्ज्ञायां विषये पूर्वपदमन्तोदात्तं भवति। कुण्डोदरः। घटोदरः। [2]कटुकाश्वः। स्पन्दिताश्वः। अनिघातेषुः। चलाचलेषुः। अनुदरः, सूदरः इत्यत्र 'नञ्सुभ्याम्' (६. २. १७२/३९०६) इत्येतद् भवति विप्रतिषेधेन॥

## नदी बन्धुनि। (१०९/३८४३)

बहुव्रीहौ समासे बन्धुन्युत्तरपदे नद्यन्तं पूर्वपदमन्तोदात्तं भवति। गार्गीबन्धुः। वात्सीबन्धुः। नदी इति किम्? ब्रह्मबन्धुः। ब्रह्मशब्द आद्युदात्तः। बन्धुनि इति किम्? [3]गार्गीप्रियः॥

## निष्ठोपसर्गपूर्वमन्यतरस्याम्। (११०/३८४४)

बहुव्रीहौ समासे निष्ठान्तमुपसर्गपूर्वं पूर्वपदमन्यतरस्यामन्तोदात्तं भवति। प्रधौतमुखः, प्रधौतमुखः प्रधौतमुखः। प्रक्षालितपादः, प्रक्षालितपादः। [4]यदि मुखशब्दः स्वाङ्गवाची तदा पक्षे 'मुखं स्वाङ्गम्' (६. २. १६७/३९०१) इत्येतद्भवति, न चेत् पूर्वपदप्रकृतिस्वरत्वेन 'गतिरनन्तरः' (६. २. ४९/३७८३) [5]इत्येतद् भवति। निष्ठा इति किम्? [6]प्रसेचकमुखः। उपसर्गपूर्वम् इति किम्? शुष्कमुखः॥

## उत्तरपदादिः। (१११/३८४५)

उत्तरपदादिः इत्येतदधिकृतम्[7]। यदित ऊर्ध्वमनुक्रमिष्याम उत्तरपदस्यादिरुदात्तो भवति इत्येवं तद्वेदितव्यम्। वक्ष्यति – 'कर्णो वर्णलक्षणात्' (६. २. ११२/३८४६)। शुक्लकर्णः। कृष्णकर्णः। उत्तरपदस्य इत्येतदापादपरिसमाप्तेः। [8]आदिः इति 'प्रकृत्या भगालम्' (६. २. १२७/३८७१) इति यावत्॥

## कर्णो वर्णलक्षणात्। (११२/३८४६)

बहुव्रीहौ समासे वर्णवाचिनो लक्षणवाचिनश्च कर्णशब्द उत्तरपदमाद्युदात्तं भवति। शुक्लकर्णः। कृष्णकर्णः। [9]लक्षणात् – दात्राकर्णः। शङ्कुकर्णः। लक्षणस्य (६. ३. ११५/१०३६) इति दीर्घत्वम्। पशूनां विभागज्ञापनार्थं दात्रशङ्कुप्रतिरूपकं कर्णादिषु चिह्नं [10]यत् क्रियते तदिह लक्षणं गृह्यते, तेन स्थूलकर्णः इत्यत्र न भवति। कर्णः इति किम्? श्वेतपादः। कूटशृङ्गः। वर्णलक्षणात् इति किम्? शोभनकर्णः॥

## सञ्ज्ञौपम्ययोश्च। (११३/३८४७)

सञ्ज्ञायाम् औपम्ये च यो बहुव्रीहिर्वर्तते तत्र कर्णशब्द उत्तरपदमाद्युदात्तं भवति। सञ्ज्ञायाम् – [11]कुञ्चिकर्णः। [12]मणिकर्णः। औपम्ये – गोकर्णः। [13]खरकर्णः॥

---

1. सञ्ज्ञायां विषये नास्ति क. 2. अश्वकाश्वः ह. क. ड. 3. देवप्रियः ह. 4. वाक्यमिदं नास्ति फ. 5. इत्याद्युदात्तः ह. 6. प्रसेवकमुखः ह. 7. वेदितव्यम् इत्यधिकम् फ. ह. 8. आद्याधिकारः ह. 9. लक्षणम् ह. 10. यत् नास्ति ह. 11. कञ्चिकर्णः ड. फ. 12. मणिकर्णः नास्ति फ. 13. अश्वकर्णः ह.